# ॥ श्रीकमलाम्बिकाष्टकम् ॥

कमलालयतटशोभित विमलालयविलसत्

कमलपति-कमलासन-कमलार्चित विभवम् ।

कमलाङ्घ्रिक कमलानन कमलाम्बिक-विलसत्

कमलाभिधमहमान्तरकमले मम कलये ॥ १ ॥

यजनपर मनुजवर शिववदनजार्चितां

भजनपर सनकमुख मुनिहृदयसंस्थिताम् ।

अजजनक हयवदन हरिहयसुपूजितां

भज हृदय रविजलज गुरुवरदशाङ्करीम् ॥ २ ॥

ईशानकोणे कमलालयस्य

श्रीत्यागरजस्य तु वायुकोणे ।

ईशानदृष्टिः कमलाम्बिकायाः

या भाति सा श्रीरमृता सतां हि ॥ ३॥

मदम्बिका हृत्कमलान्तरस्था

चिदम्बिका श्रीकमलालयस्था ।

अनन्तसौख्यं कमलासनस्था

तनोतु देवी कमलाम्बिका मे ॥ ४ ॥

अनिन्धनं समेधिते निरन्तरं हृदन्तरे

चिदाशुशुक्षणौ महाविमोहरात्रिनाशके ।

अवाच्यवैभवे परे विचित्रमा विकासिते

जुहोम्यहं धरादिमं शिवान्ततत्त्वमम्बिके ॥ ५॥

अक्षरत्रयरूपिणीमखिलाक्षवृत्तिविनाशिनीं

ऋक्षरजसुभाविताममृताक्षराङ्घ्रियुगां भजे ।

अक्षरासनसंस्थितामजशिक्षकेभमुखप्रियां

चिक्षुरादिविनाशिनीं वरलक्षणां कमलाम्बिकाम् ॥ ६ ॥

मकारवर्जं तव वामनेत्रबिन्द्वाढ्यमाद्ये कमलेति नाम ।

श्रीकामरजाख्यवरार्णरूपं भजन्ति सान्याः स्वकबोधसिद्धये ॥ ७ ॥

स्वरेश चन्द्राह्वयशीतबीजत्रयाढ्यमाधे कमलेति नाम ।

मकारवर्जं तव मूलविद्यां विद्योतयत्येव गुरुस्वरूपे ॥ ८ ॥

शान्तस्वरूपा विमलप्रकाशा

त्वमात्मरूपा च गुहान्तरस्था ।

मातश्चिदानन्दतनुर्विभासि

त्वमम्बिकेऽनन्तसुखप्रदात्रि ॥ ९ ॥

अनन्तसूत्रग्रथिता सुवर्णमालाऽतिमाधुर्यवचस्सुमाढ्या ।

गुरुस्वरूपा कमलाम्बिका या तदङ्घ्रिपद्मं समलङ्करोतु ॥

॥ इति श्रीमच्चिदानन्दनाथाख्य सद्गुरुपादाब्जामृतपायिना अनन्तानन्दनाथेन रचितः श्रीकमलाम्बिकास्तवः संपूर्णः ॥

## || śrīkamalāmbikāṣṭakam ||

kamalālayataṭaśobhita vimalālayavilasat

kamalapati-kamalāsana-kamalārcita vibhavam |

kamalāṅghrika kamalānana kamalāmbika-vilasat

kamalābhidhamahamāntarakamale mama kalaye || 1 ||

yajanapara manujavara śivavadanajārcitāṁ

bhajanapara sanakamukha munihṛdayasaṁsthitām |

ajajanaka hayavadana harihayasupūjitāṁ

bhaja hṛdaya ravijalaja guruvaradaśāṅkarīm || 2 ||

īśānakoṇe kamalālayasya

śrītyāgarajasya tu vāyukoṇe |

īśānadṛṣṭiḥ kamalāmbikāyāḥ

yā bhāti sā śrīramṛtā satāṁ hi || 3 ||

madambikā hṛtkamalāntarasthā

cidambikā śrīkamalālayasthā |

anantasaukhyaṁ kamalāsanasthā

tanotu devī kamalāmbikā me || 4 ||

anindhanaṁ samedhite nirantaraṁ hṛdantare

cidāśuśukṣaṇau mahāvimoharātrināśake |

avācyavaibhave pare vicitramā vikāsite

juhomyahaṁ dharādimaṁ śivāntatattvamambike || 5 ||

akṣaratrayarūpiṇīmakhilākṣavṛttivināśinīṁ

ṛkṣarajasubhāvitāmamṛtākṣarāṅghriyugāṁ bhaje |

akṣarāsanasaṁsthitāmajaśikṣakebhamukhapriyāṁ

cikṣurādivināśinīṁ varalakṣaṇāṁ kamalāmbikām || 6 ||

makāravarjaṁ tava vāmanetrabindvāḍhyamādye kamaleti nāma |

śrīkāmarajākhyavarārṇarūpaṁ bhajanti sānyāḥ svakabodhasiddhaye || 7 ||

svareśa candrāhvayaśītabījatrayāḍhyamādhe kamaleti nāma |

makāravarjaṁ tava mūlavidyāṁ vidyotayatyeva gurusvarūpe || 8 ||

śāntasvarūpā vimalaprakāśā

tvamātmarūpā ca guhāntarasthā |

mātaścidānandatanurvibhāsi

tvamambike'nantasukhapradātri || 9 ||

anantasūtragrathitā suvarṇamālā'timādhuryavacassumāḍhyā |

gurusvarūpā kamalāmbikā yā tadaṅghripadmaṁ samalaṅkarotu ||

|| iti śrīmaccidānandanāthākhya sadgurupādābjāmṛtapāyinā anantānandanāthena racitaḥ śrīkamalāmbikāstavaḥ sampūrṇaḥ ||

www.kamakotimandali.com